श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीतः

# ॥ श्री गरुडदण्डकः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गरुडदण्डकः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

नमः पन्नगनद्धाय वैकुण्ठवशवर्तिने।
श्रुतिसिन्धुसुधोत्पादमन्दराय गरुत्मते॥ 1 ॥

गरुडमखिलवेदनीडाधिरूढं द्विषत्पीडनोत्कण्ठिताकुण्ठवैकुण्ठपीठीकृत -
स्कन्धमीडे स्वनीडागतिप्रीतरुद्रासुकीर्तिस्तनाभोगगाढोपगूढ स्फुरत्कण्टक -
व्रात वेधव्यथावेपमान द्विजिह्वाधिपाकल्पविष्फार्यमाण स्फटावाटिका
रत्नरोचिश्छटा राजिनीराजितं कान्तिकल्लोलिनीराजितम्॥ 2 ॥

जय गरुड सुपर्ण दर्वीकराहार देवाधिपाहारहारिन् दिवौकस्पतिक्षिप्त -
दम्भोळिधाराकिणाकल्प कल्पान्तवातूल कल्पोदयानल्प वीरायितो -
द्यच्चमत्कार दैत्यारि जैत्रध्वजारोहनिर्धारितोत्कर्ष सङ्कर्षणात्मन् गरुत्मन्
मरुत्पञ्चकाधीश सत्यादिमूर्ते न कश्चित् समस्ते नमस्ते पुनस्ते नमः॥ 3 ॥

नम इदमजहत्सपर्याय पर्यायनिर्यातपक्षानिलास्फालनोद्वेलपाथोधि
वीचीचपेटाहतागाधपाताळभाङ्कारसङ्क्रुद्धनागेन्द्रपीडासृणीभाव -
भास्वन्नखश्रेणये चण्डतुण्डाय नृत्यद्भुजङ्गभ्रुवे वज्रिणे दंष्ट्रया
तुभ्यमध्यात्मविद्या विधेया विधेया भवद्दास्यमापादयेथा दयेथाश्च मे॥ 4 ॥

मनुरनुगत पक्षिवक्त्र स्फुरत्तारकस्तावकश्चित्रभानुप्रियाशेखरस्त्रायतां
नस्त्रिवर्गापवर्गप्रसूतिः परव्योमधामन् वलद्वेषिदर्पज्वलद्वालखिल्य -

प्रतिज्ञावतीर्ण स्थिरां तत्त्वबुद्धिं परां भक्तिधेनुं जगन्मूलकन्दे मुकुन्दे
महानन्ददोग्ध्रीं दधीथा मुधाकामहीनामहीनामहीनान्तक ॥ 5 ॥

षड्त्रिंशद्गणचरणो नरपरिपाटीनवीनगुम्भगणः।
विष्णुरथदण्डकोऽयं विघटयतु विपक्षवाहिनीव्यूहम् ॥ 6 ॥

विचित्रसिद्धिदः सोऽयं वेङ्कटेशविपश्चिता।
गरुडध्वजतोषाय गीतो गरुडदण्डकः ॥ 7 ॥

॥ इति श्री गरुडदण्डकः समाप्तः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥